M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref. / Ser. 868

Title: Eddha Shanti

865

865

उदकशांति from प्रतिसरबंध

	Udaka Shānti from		Title
		Pratisarabandha	Author
			Editor
			Year, Vols.
			Publisher
865			Remarks

स्था श्रीगणेशाय नमः ॥ अविघ्नमस्तु ॥ आधानादौ संकल्प्यात्प्रवेदिनेः स्वानांदीमुखं
१ कृत्वा रात्रावुदकशांतिं कुर्यात् पारेोप्राक्षाल्याचम्य युग्मान्ब्राह्मणान्प्रक्षा
लितपाणिपादानाचम्य प्रतिदिशमासनेषूपविश्य मध्ये गोमयेन गोचर्ममात्रं
चतुरस्रमुपलिप्य दर्भेषु प्राङ्मुखः सपत्नीक उपविश्य दूर्वादर्भान्धारयमाणः
पवित्रपाणिः प्राणानायम्य तिथ्यादि संकीर्त्य करिष्यमाणकर्मांगभूतां उदकशांतिं
करिष्य इति संकल्प्य ॥ स्थंडिलदेशं मध्ये यज्ञांगकाष्ठेन रश्मीसुद्धृत्य वक्ष्यत
त्रपंचप्रस्थ शुक्लसिकतानां स्थंडिलं चतुरस्रमरत्निमात्रं कुर्यात् स्वर्णेन रज
तेनाणिताम्रेण व्रीहिणा पिवा दर्भयुक्तेन षड्रेखाः कुर्यात्स्थंडिलमध्यतः अं श्रीराम
गुष्ठोपकनिष्ठिकाभ्यां गृहीत्वा लेखासाधनं स्थंडिलमध्ये प्रतीचीमारभ्य प्रा
कृसंस्थां प्रादेशमात्रां रेखां लिखेत् तत्र मंत्रः ब्रह्मजज्ञानं प्रथमं पुरस्ताद्विसी १
मतः सुरुचो वेन आवः सबुध्निया उपमा अस्य विष्ठाः सतश्च योनिमस

तश्च विवः ॥ तस्या दक्षिणतः नाके सुपर्णमुपयत्पतंतं हृदा वेनंतो अभ्यचक्षत त्वा हि
रण्यपक्षं वरुणस्य दूतं यमस्य योनौ शकुनं भुरण्युं पूर्वस्या उत्तरतः आप्यायस्व
समेतु ते विश्वतः सोम वृष्ण्यं भवा वाजस्य संगथे पूर्ववल्लेखां लिखेत्
स्थंडिलमध्ये दक्षिणमारभ्योदगपवर्गं प्रादेशमात्रां पूर्ववल्लेखां ॥ यो रुद्रो अ
ग्नौ यो अप्सु य ओषधीषु यो रुद्रो विश्वा भुवना विवेश तस्मै रुद्राय नमो अस्तु
तस्याः पश्चिमत उदीची इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं समूढमस्य पांसु
रे ॥ तस्याः पूर्वत उदीची ॥ इंद्रं विश्वा अवीवृधन्समुद्रव्यचसं गिरः रथीतमं
रथीनां वाजानां सत्पतिं पतिं ॥ लेखासाधनं स्थंडिले निधाय रेखस्यलेख्य
नुद्धृत्य कराभ्यां तल्लेखासाधनं गृहीत्वा ॥ ॐ भूर्भुवः सुवरिति स्थंडिलादुत्तर तो
योनिरस्याप उपस्पृश्य स्थंडिलादुत्तरतः प्रागग्रान्दर्भान्संस्तीर्य तेषु प्रादक्षिणीं
सूत्रवेष्टितमुदकुंभं संसारयित्वा दर्भैः प्रच्छाद्य पवित्रं कृत्वा प्रादक्षिणीमुत्तानां कस्त

उदकशां० तस्यामुत्तराग्रं पवित्रं निधायोदकमासिच्य तस्मिन् त्रिरुत्पूय प्रोक्षणीं पवित्रेण प्रोक्ष्यो

दकुंभं धूपयित्वा स्थण्डिलोपरि प्रागग्रान् दूर्वाः दर्भान् वास्तीर्य गंधोदकेनाभ्युक्ष्य पु

२ ष्पैः फलैश्चावाकीर्य तत्र ब्रह्मजज्ञानमित्युदकुंभं निधाय ततः स्थण्डिलं परिस्तरेत्

उत्तानं [illegible] दर्भस्यञ्जा० हस्ताभ्यां परिस्तरणामीति उदगग्रान् दर्भानास्तीर्य दक्षिणतो भूर्भुवः स्व

पवित्र [illegible] वरिति प्रागग्रान् ० पश्चिमतः ० उद्वयं तमसस्परीत्युदगग्रान् उत्तरतः ॥ अग्न आ

उदकुंभं याहि वीतय इति प्रागग्रान् ० कुंभेतिरः पवित्रं निधायाप आनयन् जपति ॥ तत्सवि

२ तुर्वरेण्यमिति कुंभे यवाक्षततंडुलानावपति भूर्भुवः सुवरोमिति उदकुंभस्यो

परि समंतात् पुष्पदूर्वाफलान्यवकिरेत् उदकुंभं दूर्वाग्रैः प्रक्षाल्याभिमृ

शति शन्नो देवीरभिष्टय इति ततो द्विजान् वृणुयात् अस्मिन् कर्मणि पूर्वस्यां

दिशि जपकर्तृत्वेन त्वामहं वृणे० एवं दक्षिणस्यां पश्चिमायामुत्तरस्यां यजमा २

नोक्ता ब्राह्मणाश्चोदकुंभं दर्भैः स्पृशंतो जपंति ॥ ओं भूर्भुवः स्वः गायत्रीं

पच्चोर्ईर्ग्रा सर्वानुक्त्वा वेदादीन् जपंति तेच कृणुष्व पाजः प्रसितिं न पृथ्वीं० द्रुहो

निरोमि त्रमहा अवद्यात् ॥ रक्षोहणं वाजिनमाजिघर्मि० सनो दिवास रिषः पातु

नक्तं ॥ विज्योतिषा बृहता भात्यग्निः० शिशीते शृंगे रक्षसे विनिक्षे ॥ उत स्वानासो

दिवि षंत्वग्नेस्तिग्मायुधा रक्षसे हंतवा उ ॥ मदे चिदस्य प्ररुजंति भामा न वरंते प

रिबाधो अदेवीः ॥ इंद्रं वो विश्वतस्परि० अस्माकमस्तु केवलः ॥ इंद्रं नरो नेमधिता हवंते०

गोमति व्रजे भजा त्वं नः ॥ इंद्रियाणि शतक्रतो या० ते जनेषु पंचसु ॥ अनु ते दायि मह इं

द्रियाय० देवा अनु ते नृषह्ये ॥ आ यस्मिन्सप्त वासवा स्तिष्ठंति स्वारुहो यथा ॥

ऋषिर्ह दीर्घश्रुत्तम इंद्रस्य घर्मो अतिथिः ॥ आमासु पक्वमैरय० जुष्टं गिर्वणसे

गिरः ॥ इंद्र मिद्गाथिनो बृहत् ॥ इंद्रं वाणीरनूषत ॥ गायंति त्वा गायत्रिणः० शतक्रतो उ

दृंश मिव येमिर ॥ अंहोमुचे प्र भरेमा मनीषामोषिष्ठदाव्ने सुमतिं गृणानाः०

इदमिंद्र प्रतिहव्यं गृभाय सत्याः संतु यजमानस्य कामाः ॥ विवक्षणं मा धिषणा ज

जाना॰ नावेनयंतंतुभ्रयेहवंते॥प्रसम्राजंप्रथममध्वराणांमंहोमुचंवृषभंयज्ञि
यानां॥अपांनपातमश्विनाहवंतमस्मिंन्नरइंद्रियंधत्त ओजः॥विनइंद्रमृधोज
हिनीचायच्छपृतन्यतः॥अधस्पदंतमींकृधियो अस्माँ अभिदासति॥इं
द्रक्षत्रमभिवाममोजोजायथावृषभचर्षणीनां॥अपानुदोजनममित्रयंतमुरुं
देवेभ्यो अकृणोमुरुलोकं॥मृगोनभीमःकुचरोगिरिष्ठाःपरावतआ
जगंथापरस्याः॥सृकंसंशायपविमिंद्रतिग्मंविशत्रून्ताढिविमृधोनुदस्व॥
विशत्रून्विमृधोनुदविवृत्रस्यहनूरुज॥विमन्युमिंद्रभामितोमित्रस्याभिदासतः॥
त्रातारमिंद्रमवितारमिंद्रंहवेहवेसुहवंशूरमिंद्रं॥हुवेनुशक्रंपुरुहूतमिं
द्रंस्वस्तिनोमघवाधात्विंद्रः॥माते अस्यांसहसावन्परिष्टा॰ तवप्रिया
सःसूरिषुस्याम॥अनवस्तेरथमश्वायतक्षं॰ वर्धयंनहयेहंतवाउ॥वृष्णे
यत्तेवृषणो अर्कमर्चा॰ इंद्रद्युषितो अभ्यवर्त्तंतदस्यून्॥यतइंद्रभयामहेततो॰

ऊतयेविद्विषोविमृधोजहि॥स्वस्तिदाविशस्पतिर्वृत्रहाविमृधोवशी॥वृषेंद्रः
पुरएतुनःस्वस्तिदा अभयंकरः॥महाँइंद्रोवज्रबाहुःषोडशीशर्मयच्छ
तु॥स्वस्तिनोमघवाकरोतुहंतुपाप्मानंयो अस्मान्द्वेष्टि॥उपयामगृहीतोसीं
द्रायत्वाषोडशिनएषतेयोनिरिंद्रायत्वाषोडशिने॥सजोषाइंद्रसगणोमरुद्भिः
सोमंपिबवृत्रहञ्छूरविद्वान्॥जहिशत्रूंरपमृधोनुदस्वाथाभयंकृणुहि
विश्वतोनः॥उपयामगृ॰ षोडशिने॥येदेवाःपुरःसदोग्निनेत्रारक्षोहणस्तेनः
पांतुतेनोवंतुतेभ्योनमस्तेभ्यःस्वाहासमूढंरक्षःसंदग्धंरक्षइदमहंरक्षो
भिसंदहामि॥१॥येदेवादक्षिणसदोयमनेत्रारक्षोहणस्तेनःपांतुतेनोवंतु॰
रक्षोभिसंदहामि॥२॥येदेवाःपश्चात्सदःसवितृनेत्रारक्षोहणस्तेनःपां
तुते॰ संदहामि॥३॥येदेवाउत्तरसदोवरुणनेत्रारक्षोहणस्तेनःपांतु॰॥४॥
येदेवाउपरिषदोबृहस्पतिनेत्रारक्षोहणस्तेनःपांतु॰ संदहामि॰॥५॥अग्नये

उ॰ रम॰ रक्षोघ्ने स्वाहा॰ यमाय रक्षोघ्ने स्वाहा॰ सवित्रे रक्षोघ्ने स्वाहा॰ वरुणाय रक्षो॰
४ बृहस्पतये॰ वनस्पते रक्षोघ्ने स्वाहा॰ ६ अग्निरायुष्मान्स वनस्पतिभिरायु
ष्मान्तेन त्वायुषायुष्मन्तं करोमि॥ सोम आयुष्मान्स ओषधीभिरायु॰ यज्ञ आयु
युष्मान्स दक्षिणाभिरायुष्मा॰ ब्रह्मायुष्मान्तद्ब्राह्मणैरायुष्मा॰ करोमि॰ देवा
आयुष्मान्तस्ते न त्वायुषा॰ करोमि॥ यावामिंद्रावरुणा यतव्या तनूस्तयेम
मꣳहसो मुञ्चतं॥ यावामिंद्रावरुणा सहस्या॰ यावामिंद्रावरुणा सहस्यो॰ व्यावा
मिंद्रावरुणा तेजस्या॰ ७॥ यो वामिंद्रावरुणावग्नौ स्त्रामस्तं वामेतेनवायजे॥
योवामिंद्रावरुणा द्विपात्सु पशुषु॰ योवामिंद्रावरुणा चतुष्पात्सु पशुषु॰ योवा
मिंद्रावरुणा गोष्ठे स्त्राम॰ योवामिंद्रावरुणा गृहेषु स्त्राम॰ योवामिंद्रावरु शिवो॰
णाप्सु स्त्राम॰ योवामिंद्रावरुणौषधीषु स्त्रामस्त॰ योवामिंद्रावरुणौ वनस्प ४

ध्नतनायुष्मंतस्ते द्रा५

संरभध्वमिमं पश्चादनुजीवाथ सर्वे ४ ऋताषाडृतधामाग्निर्गंधर्वस्तस्योषध
योऽप्सरसो मुदो नाम स इदं ब्रह्म

तिषु स्त्रामस्तं वामेतेनावयजे ८ अस्याग्ने येशश्चिन्यशसे समर्पयेंद्र
वतीमपचितीमिहावह॰ अयं मूर्धा परमेष्ठी सुवर्चाः समानानामुत
मश्लोको अस्तु भद्रं पश्यंत उपसेदुरग्रे तपोदीक्षामृषयः सुवर्विदः॥ ततः
क्षत्रं बलमोजश्च जातं तदस्मै देवा अभिसंनमंतु॥ धाता विधाता परमोत संदृ म
क्प्रजापतिः परमेष्ठी विराजा॥ स्तोमाश्छंदांसि निविदो म आयुरेत ऊ
स्मैराष्ट्रमभिसंनमाम। अभ्यावर्तध्वमुपमेत साकमयꣳ शास्ताधिपति
र्वो अस्तु। अस्य विज्ञानमनुसꣳरक्षत्रं पातु ताद्रुं ब्रह्म क्षत्रं पातु तस्मै स्वाहा
ताभ्यः स्वाहा। सꣳहितो विश्वसामा सूर्यो गंधर्वस्तस्य मरीचयोऽप्सरस आ
युवः सुषुम्नः सूर्यरश्मिश्चंद्रमा गंधर्वस्तस्य नक्षत्राण्यप्सरसो वेकुरयो
भुज्युः सुपर्णो यज्ञो गंधर्वस्तस्य दक्षिणा अप्सरस स्तवाः प्रजापतिर्विश्वक

उ.क.शां. र्मामनोगंधर्वस्तस्यऋक्सामान्यप्सरसोवन्हयइषिरोविश्वव्यचावातोगंध
५ र्वस्तस्यापोप्सरसोमुदा।भुवनस्यपतेयस्यतउपरिगृहाइहच।सनोरास्वा
ज्यानिंरायस्पोषंसुवीर्यंसंवत्सरीणांस्वस्तिं।परमेष्ठ्यधिपतिर्मृत्यु
र्गंधर्वस्तस्यविश्वमप्सरसोभुवःसुक्षितिःसुभूतिर्भद्रकृत्सुवर्वान्पर्जन्यो
गंधर्वस्तस्यविद्युतोप्सरसोरुचोदूरेहेतिरमृडयोमृत्युर्गंधर्वस्तस्य
प्रजाअप्सरसोभीरुवश्चारुःकृपणकाशीकामोगंधर्वस्तस्याप्सरसः धयो
शोचयंतीनामसइदंब्रह्मक्षत्रंपातुताइदंब्रह्मक्षत्रंपातुतस्मैस्वाहाता
भ्यःस्वाहा।सनोभुवनस्यपतेयस्यतउपरिगृहाइहच।उरुब्रह्मणेस्मै यामः
क्षत्रायमहिशर्मयच्छ।नमोअस्तुसर्पेभ्योयेकेचपृथिवीमनु।येअंत
रिक्षेयेदिवितेभ्यःसर्पेभ्योनमः।येदोरोचनेदिवोयेवासूर्यस्यरश्मिषु। ५

येषामप्सुसदःकृतंतेभ्यःसर्पेभ्योनमः।याइषवोयातुधानानांयेवावन
स्पतींरनु।येवावटेषुशेरतेतेभ्यःसर्पेभ्योनमः।अयंपुरोहरिकेशःसूर्य
रश्मिस्तस्यरथगृत्सश्चरथौजाश्चसेनानीग्रामण्यौपुंजिकस्थलाच
क्रतुस्थलाचाप्सरसौयातुधानाहेतीरक्षांसिप्रहेतिस्तेभ्योनमस्तेनोमृ
वो डयंतुतेयंद्विष्मोयश्चनोद्वेष्टितंवोजंभेदधामि॥१॥अयंदक्षिणाविश्वकर्मा
तस्यरथस्वनश्चरथेचित्रश्चसेनानीग्रामण्यौमेनकाचसहजन्याचाप्स
रसौदंक्ष्णवःपशवोहेतिःपौरुषेयोवधःप्रहेतिस्तेभ्योनमस्तेनो॰वोजं
भेदधामि॥अयंपश्चाद्विश्वव्यचास्तस्यरथप्रोतश्चासमरथश्चसेना
नीग्रामण्यौप्रम्लोचंतीचानुम्लोचंतीचाप्सरसौसर्पाहेतिर्व्याघ्राःप्रहेतिस्ते
भ्योनमस्तेनो॰वोजंभेदधामि॥३॥अयमुत्तरात्संयद्वसुस्तस्यसेनजि

उ॰ शां॰ ६

ब्रह्मचेयश्च सेनानिग्रामण्यौ विश्वाची च घृताची चाप्सरसावापो हेतिर्वातः
प्रहेतिस्तेभ्यो नमस्ते नो॰ जंभे दधामि ।१७। अयमुपर्यर्वाग्वसुस्तस्य तार्क्ष्य
श्चारिष्टनेमिश्च सेनानिग्रामण्यावुर्वशी च पूर्वचित्तिश्चाप्सरसौ विस्फूर्जति
रवस्फूर्जन्प्रहेतिस्तेभ्यो नमस्ते नो॰ ।१८। आशुः शिशानो वृषभो न युध्मो घना
घनः क्षोभणश्चर्षणीनां । संक्रंदनोऽनिमिष एकवीरः शतं सेना अजयत्सा
कमिंद्रः । संक्रंदनेनानिमिषेण जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना । त
दिंद्रेण जयत तत्सहध्वं युधो नर इषुहस्तेन वृष्णा । स इषुहस्तैः स निषं
गिभिर्वशी सं स्रष्टा स युध इंद्रो गणेन । संसृष्टजित्सोमपा बाहुशर्ध्यू
र्ध्वधन्वा प्रतिहिताभिरस्ता । बृहस्पते परिदीया रथेन रक्षोहामित्राँ अपबा
धमानः । प्रभंजन्सेनाः प्रमृणो युधा जयन्नस्माकमेध्यविता रथानां । गो

राम॰ ६

त्रभिदं गोविदं वज्रबाहुं जयंतमज्म प्रमृणंतमोजसा । इमं सजाता अनुवी
रयध्वमिंद्रं सखायो अनु संरभध्वं । बलविज्ञाय स्थविरः प्रवीरः सहस्वा
न्वाजी सहमान उग्रः । अभिवीरो अभिसत्वा सहोजा जैत्रमिंद्र रथमातिष्ठ
गोवित् । अभिगोत्राणि सहसा गाहमानोऽदयो वीरः शतमन्युरिंद्रः । दुश्च्य
वनः पृतनाषाडयुध्योऽस्माकं सेना अवतु प्रयुत्सु । इंद्र आसां नेता बृहस्पति
र्दक्षिणा यज्ञः पुर एतु सोमः । देवसेनानामभिभंजतीनां जयंतीनां मरुतो यंत्व
ग्रे । इंद्रस्य वृष्णो वरुणस्य राज्ञ आदित्यानां मरुतां शर्द्ध उग्रं । महामनसां भु
वनच्यवानां घोषो देवानां जयतामुदस्थात् । अस्माकमिंद्रः समृतेषु ध्वजेष्व
स्माकं या इषवस्ता जयंतु । अस्माकं वीरा उत्तरे भवंत्वस्मानु देवा अवता हवेषु ।
द्धर्षय मघवन्नायुधान्युत्सत्वनां मामकानां मनांसि । उद्वृत्रहन्वाजिनां वा

उ॰ शां॰ वाजिनीनांन्युद्धथानांजयतामेतुघोषः।उपप्रेतजयतानरःस्थिरावःसंतुबाहवः॥
६ इंद्रोवःशर्मयछत्वनाधृष्यायथासथ।अवसृष्टापरापतशरव्येब्रह्मसंशिता।
गछामित्रान्प्रविशमैषांकंचनोछिषः।मर्म्माणितेवर्म्मणाछादयामिसोमस्त्वारा
जामृतेनाभिवस्तां।उरोर्वरीयोवरुणस्तेअस्तुजयंतंत्वामनुमदंतुदेवाः।यत्र
बाणाःसंपतंतिकुमाराविशिखाइव।इंद्रोनस्तत्रवृत्रहाविश्वाहाशर्मयछतु॥
शंचमेमयश्चमे॥१॥ममाग्नेवर्चोविहवे॰हरिवोमदिनंत्वा॥अग्नेर्मन्वेप्रथमस्य
प्रचेतसःपांचजन्यंबहवःसमिंधते।विशेविश्यांविशिविप्रविशिवांसमी
महेसनोमुंचत्वंहसः।यस्येदंप्राणन्निमिषद्यदेजतियस्यजातंजनमानंचके
वलं।स्तौम्यग्निंनाथितोजोहवीमिसनोमुंचत्वंहसः।इंद्रंमन्वेप्रथमस्य राम॰
प्रचेतसोवृत्रघ्नस्तोमाउपमामुपागुः।योदाशुषःसुकृतोहवमुपगंतासनोमुंच ७
त्वंहसः।यःसंग्रामंनयतिसंवशीयुधेयःपुष्टानिसंसृजतित्रयाणि।स्तौमीं

द्रंनाथितोजोहवीमिस॰।मन्वेवांमित्रावरुणातस्यवित्तंसत्यौजसाद्रुहणायंनुदे
थे।याराजानंसरथंयाथउग्रातानोमुंचतमागसः।योवांरथऋजुरश्मिःसत्य
धर्म्मामिथुश्चरंतमुपयातिदूषयन्।स्तौमिमित्रावरुणानाथितोजोहवीमितौ
नोमुंचतमागसः।वायोःसवितुर्विदथानिमन्महेयावात्मन्वद्विभृतोयौचरक्षतः।
यौविश्वस्यपरिभूबभूवतुस्तौनोमुंचतमागसः।उपश्रेष्ठानआशिषोदेवयोर्ध
मेअस्थिरन्।स्तौमिवायुंसवितारंनाथितोजोहवीमितौनोमुंचतमागसः।
रथीतमौरथीनामह्वऊतयेशुभंगमिष्ठौसुयमेभिरश्वैः।ययोर्वांदेवौदेवेष्वनिशि
तमोजस्तौनोमुंचतमागसः।यद्यातंवहतुंसूर्यायात्रिचक्रेणसंसदमिच्छमा
नौ।स्तौमिदेवावश्विनौनाथितोजोहवीमितौनोमुंचतमागसः।मरुतांमन्वेअ
धिनोब्रुवंतुप्रेमांवाचंविश्वामवंतुविश्वे।आशूनुवसुयामनरतयेतेनोमुंचं
त्वेनसः।तिग्ममायुधंवीडितंसहस्वद्दिव्यंशर्धःपृतनासुजिष्णु।स्तौमिदे
उ॰ शां॰
७।

उ.शां. वामरुतोनाथितोजोहवीमितेनोमुंचंत्वेनसः।देवानांमन्वेअधिनो॰यिश्ये।
८ आश्वस्तुवे॰तेनोमुंचंत्वेनसः।यदिदंमाभिशोचतिपौरुषेयेणदैव्येन।स्तोमि
विश्वान्देवान्नाथितोजोहवीमितेनोमुंचंत्वेनसः।अनुनोद्यानुमतिर्यज्ञंदेवेषु
मन्यतां।अग्निश्चहव्यवाहनोभवतांदाशुषेमयः।अन्विदनुमतेत्वंमन्यासेशं
चनस्कृधि।क्रत्वेदक्षायनोहिनुप्रणआयूंषितारिषः।वैश्वानरोनऊत्याप्रया
तुपरावतः।अग्निरुक्थेनवाहसा।पृष्टोदिविपृष्टोअग्निःपृथिव्यांपृष्टोविश्वा
ओषधीराविवेश।वैश्वानरःसहसापृष्टोअग्निःसनोदिवासरिषःपातुनक्तं।
येअप्रथेतामभितेभिरोजोभिर्येप्रतिष्ठेअभवतांवसूनां।स्तोमिद्यावापृथि
वीनाथितोजोहवीमितेनोमुंचतमंहसः।उर्वीरोदसीवरिवःकृणोतंक्षेत्रस्यप राम.
त्नीअधिनोब्रूयातं।स्तौमिद्यावापृथिवीनाथितोजोहवीमितेनो॰यत्तेवयंपु ८

रुषत्रायविष्ठाविद्वांसश्चकृमाकच्चनागः।कृधीस्वस्मांअदितेरनागाव्येनांसि
शिश्रथोविष्वगग्ने।।यथाहतद्वसवोगौर्यंचित्पदिषितामुमुंचतायजत्राः।एवोत्वम
स्मन्मुंचाव्यंहः।प्रातार्यग्नेप्रतरांनआयुः।२२।समीचीनामासिप्राचीदिक्तस्या
स्तेग्निरधिपतिरसितोरक्षितायश्चाधिपतिर्यश्चगोप्तातांभ्यांनमस्तौनोमृडयतांते
तेयंद्विष्मोयश्चनोद्वेष्टितंवांजंभेदध्मामि।१।ओजस्विनीनामासिदक्षिणादिक्त
स्यास्तइंद्रोधिपतिःपृदाकूरक्षितायश्चाधिपतिर्यश्चगोप्तातांभ्यांनमस्तौनो॰स्था
नि।२।प्राचीनामासिप्रतीचीदिक्तस्यास्तेसोमोधिपतिःस्वजोरक्षितायश्चाधि
प॰स्थानि॰।३।अवस्वान्नामास्युदीचीदिक्तस्यास्तेवरुणोधिपतिस्तिरश्चराजी
रक्षितायश्चाधिप॰स्थानि।४।अधिपत्नीनामासिबृहतीदिक्तस्यास्तेबृह
स्पतिरधिपतिश्वित्रोरक्षितायश्चाधिपतिर्य॰।५।वशिनीनामासीयंदिक्तस्या
स्तेयमोधिपतिःकल्माषग्रीवोरक्षितायश्चाधिपति॰।६।हेतयोनामस्थतेषांवः

रु॰शां॰ ९

पुरोगृहा अग्निर्वा इषवः सलिलो वातनामं तेभ्यो वो नमस्ते नो मृडयंतु ते यं द्विष्मो
यश्च नो द्वेष्टि तं वो जंभे दधामि ॥१॥ निलिंपा नाम स्थ तेषां वो दक्षिणा गृहाः पित
रो व इषवः सगरो वातनामं तेभ्यो वो नमस्ते०॥२॥ नावज्रिणा नाम स्थ तेषां वः प
श्चाद्गृहाः स्वप्नो न इषवो गगरा इरो वातनामं तेभ्यो वो नमस्ते०॥३॥ अवस्थावा
नाम स्थ तेषां व उत्तराद्गृहा आपो व इषवः समुद्रो वातनामं तेभ्यो वो नमः०॥४॥
अधिपतयो नाम स्थ तेषां व उपरि गृहा वर्षं व इषवो वस्वान्वातनामं तेभ्यो वो०॥५॥
क्रव्या नाम स्थ पार्थिवास्तेषां व इह गृहा अन्नं व इषवो निमिषो वातनामं तेभ्यो
वो नमस्ते० दधामि०॥६॥ शतायुधाय शतवीर्याय शतोतयेभिमातिषाहे । शतं यो
नः शरदो अजीतानिंद्रो नेषदति दुरितानि विश्वा । ये चत्वारः पथयो देवयाना
अंतरा द्यावापृथिवी वियंति तेषां यो अज्यानिमजीतिमावहात्तस्मै नो देवाः
परिदत्तेह सर्वे । ग्रीष्मो हेमंत उत नो वसंतः शरद्वर्षाः सुवितं नो अस्तु । तेषाम्

शिवो॰ ९

ऋतूनां शतशारदानां निवात एषामभये स्याम । इद्वत्सराय परिवत्सराय संवत्स
राय कृणुता बृहन्नमः । तेषां वयं सुमतौ यज्ञियानां ज्योगजीता अहताः स्याम ॥
भद्रान्नः श्रेयः समनैष्ट देवास्त्वयावसेन समशीमहि त्वा । स नो मयोभूः पितो आ
विशस्व शं तोकाय तनुवे स्योनः ॥५॥ भूतं भव्यं भविष्यद्वषट्स्वाहा नमः ऋक्सा
म यजुर्वषट्स्वाहा नमो गायत्री त्रिष्टुब्जगती वषट्स्वाहा नमः पृथिव्यंतरिक्षं
द्यौर्वषट्स्वाहा नमोग्निर्वायुः सूर्यो वषट्स्वाहा नमः प्राणो व्यानोपानो वषट्
स्वाहा नमोन्नं कृषिर्वृष्टिर्वषट्स्वाहा नमः पिता पुत्रः पौत्रो वषट्स्वाहा नमो भूर्
भुवः स्वर्वषट्स्वाहा नमः ॥ इंद्रो दधीचो अस्थभिर्वृत्राण्यप्रतिष्कुतः ॥
जघान नवतीर्नव । इच्छन्नश्वस्य यच्छिरः । पर्वतेष्वपश्रितं । तद्विदच्छर्यणावति । अत्रा
ह गोरमन्वत । नाम त्वष्टुरपीच्यं । इत्था चंद्रमसो गृहे । इंद्रमिद्गाथिनो बृहत् ॥
इंद्रमर्केभिरर्किणः ॥ इंद्रं वाणीरनूषत । इंद्र इद्धर्योः सचा । संमिश्ल आवचोयुजा ।

इंद्रोवज्रीहिरण्ययः। इंद्रोदीर्घायचक्षसे। आसूर्यंरोहयोदिवि। विगोभिरद्रिमै
रयत्। इंद्रोवाजेषुनोअव। सहस्रप्रधनेषुच। उग्रउग्राभिरूतिभिः। तमिंद्रंवाजयामसि।
महेवृत्रायहंतवे। सवृषावृषभोभुवत्। इंद्रः सदामनेकृतः। ओजिष्ठः सबलेहितः। द्युम्नीश्लोकीससोम्यः। गिराबज्रोनसंभृतः। सबलोअनपच्युतः। ववक्ष
उग्रोअस्तृतः। चक्षुषाहतेमनसाहते। वाचाहतेब्रह्मणाहते। योमाघायु
रभिदासति। तमग्नमेन्यामुंनिर्दहणु। योमाचक्षुषायोमनसा। योवाचाब्रह्मणाघा
युरभिदासति। तयाग्नित्वंमेन्या। अमुमनिर्दहण। यत्किंचासौमनसायच्चवा
चायज्ञैर्जुहोतियजुषाहविर्भिः। तन्मृत्युर्निरृत्यासंविदानः। पुरादिष्टादाहुतीर
स्यहंतु। यातुधानानिर्ऋतिराद्युरक्षः। तेअस्यघ्नंत्वनृतेनसत्यं। इंद्रेषिता आज्य
मस्यमंतु। मातत्समृद्धियदसौकरोति। हन्मितेहंस्रुतंहविः। योमेघोरमचीकृतः।
अपांचौतउभौबाहू। अपनह्याम्यास्यं। अपनह्यामितेबाहू। अपनह्यास्या

म्यास्यं। अग्नेर्देवस्यब्रह्मणा। सर्वंतेवधिषंकृतं। पुरामुष्यवषट्कारात्। यज्ञंदेवे
षुनस्कृधि। स्विष्टमस्माकंभूयात्। मास्मांप्रापन्नरातयः। अंतिदूरेसतोअग्ने।
भ्रातृव्यस्याभिदासतः। वषट्कारेणवज्रेण। कृत्याऽहन्मिकृतामहं। योमानक्तंदिवा
सायं। प्रातश्चाह्नोनिपीयति। अद्यातमिंद्रवज्रेण। भ्रातृव्यंपादयामसि॥ ॥प्रा
णोरक्षतिविश्वमेजत्। इर्योभूत्वाबहुधाबहूनि। सइत्सर्वंव्यानशे। योदेवोदेवेषु
विभूरंतः॥ आवृदूदक्षित्रयध्वगद्वा। तमित्प्राणंमनसोपशिक्षत। अग्रंदेवानामि
दमत्तुनोहविः। मनसश्चित्तेदं। भूतंभव्यंचगुप्यते। तद्धिदेवेष्वग्रियं। आनस्तुपु
रध्वरं। सहदेवेरिमंहवं। मनःश्रेयसिश्रेयसि। कर्मन्यद्रूपतिंदधत्। जुषतां
मेवागिदंहविः। विराड्देवीपुरोहिता। हव्यवाडनपायिनी। ययारूपाणिबहु
धावदंति। पेशांसिदेवाःपरमेजनित्रे। सानोविराडनपस्फुरंती। वाग्देवी
जुषतामिदंहविः। चक्षुर्देवानांज्योतिरमृतेन्यक्तं। अस्यविज्ञानायबहुधानि

दीयते। तस्य सुम्नमशीमहि। मानो हासीड्रिचक्षणं। आयुरिन्नः प्रतीर्यतां। अनं
धाश्चक्षावयं। जीवाज्योतिरशीमहि। सुवर्ज्योतिरुतामृतं। श्रोत्रेणभद्रमुतशृ
ण्वंतिसत्यं। श्रोत्रेणवाचंबहुधोद्यमानां। श्रोत्रेणमोदश्च महश्च श्रूयते। श्रो
त्रेणसर्वादिश आशृणोमि। येनप्राच्याउतदक्षिणा। प्रतीच्यैःदिशःशृण्वं
त्युत्तरात्। तदिच्छोत्रंबहुधोद्यमानं। आरान्ननेमिःपरिसर्वंबभूव॥ ॥सिंहे
व्याघ्रउतयापृदाकौ। याराजन्येदुंदुभौ। याहस्तिनिद्वीपिनिद्वीपिनि। रथेअक्षे
षुराडसिविराडसि। सम्राडसिस्वराडसि। इंद्रायत्वातेजस्वतेतेजस्व
न्तं श्रीणामि। इंद्रायत्वौजस्वतओजस्वन्तं श्रीणामि। इंद्रायत्वापयस्वतेप
यस्वन्तं श्रीणामि। इंद्रस्यत्वायुष्मतआयुष्मन्तं श्रीणामि। तेजोसि। तत्तेप्रय
च्छामि। तेजस्वदस्तुमेमुखं। तेजस्वच्छिरोअस्तुमे। तेजस्वान्विश्वतःप्रत्य
ङ्। तेजसासंपिपृग्धिमा। ओजोसि। तत्तेप्रयच्छामि। ओजस्वदस्तुमेमुखं॥

ओजस्वच्छिरोअस्तुमे। ओजस्वान्विश्वतःप्रत्यङ्। ओजसासंपिपृग्धिमा। पयो
सि। तत्तेप्रयच्छामि। पयस्वदस्तुमेमुखं। पयस्वच्छिरोअस्तुमे। पयस्वान्विश्वतः
प्रत्यङ्। पयसासंपिपृग्धिमा। आयुरसि। तत्तेप्रयच्छामि। आयुष्मदस्तुमेमुखं।
आयुष्मच्छिरोअस्तुमे। आयुष्मान्विश्वतःप्रत्यङ्। आयुषासंपिपृग्धिमा। इम
मग्नआयुषेवर्चसेकृधिप्रियंरेतोवरुणसोमराजन्। मातेवास्माअदितेशर्मय
च्छ। विश्वेदेवाजरदष्टिर्यथासत्। आयुरसिविश्वायुरसि। सर्वायुरसिसर्वमायुर
सि। यतोवातोमनोजवाः। यतःक्षरंतिसिंधवः। तासांत्वासर्वासांरुचा। अभिषिंचा
मिवर्चसा। समुद्रइवासिगह्मना। सोमइवास्यदाभ्यः। अग्निरिवविश्वतः
प्रत्यङ्। सूर्यइवज्योतिषाविभूः। अपांयोद्रवणेरसः। तमहमस्मामुष्यायणाय
तेजसेब्रह्मवर्चसायगृह्णामि। अपांयऊर्मौरसः। तमहमस्मामुष्यायणायओज
सेवीर्यायगृह्णामि। अपांयोमध्यतोरसः। तमहमस्मामुष्यायणाय। पुष्ट्यैप्रजननाय

उ.शां. ह्वामि । अपां योम... रसः । तमहं । आयुषे दीर्घायुत्वाय ह्वामि । अह
१२ मस्मि प्रथमजा ऋतस्य ॥ पूर्वं देवेभ्यो अमृतस्य नाभिः । यो मा ददाति स इ
देव मावाः । अहमन्नमन्नमदन्तिमद्मि । पूर्वमग्नेरपि दहत्यन्नं । यत्तो हासाते
अहमुत्तरेषु । व्यात्तमस्य पशवः सुजंभं । पश्यंति धीराः प्रचरंति पाकाः ॥
न जहाम्यन्यं न जहाम्यन्यं । अहमन्नं वशमिच्चरामि । समानमर्थं पर्येमि भुंजत् ।
को मामन्नं मनुष्यो दयेत । पराके अन्नं निहितं लोक एतत् । विश्वैर्देवैः पितृभि
र्गुप्तमन्नं । यदद्यते लुप्यते यत्परोप्यते । शततमी सा तनूर्मे बभूव । महान्तौ च
रू सकृद्दुग्धेन पप्रौ । दिवं च पृश्नि पृथिवीं च साकं । तत्संपिबंतो न मिनंति वे राम.
धसः । नैतद्भूयो भवति नो कनीयः । अन्नं प्राणमन्नमपानमाहुः । अन्नं मृ १२
त्युं तमु जीवातुमाहुः । अन्नं ब्रह्माणो जरसं वदंति । अन्नमाहुः प्रजननं प्रजा
नां । मोघमन्नं विंदते अप्रचेताः । सत्यं ब्रवीमि वध इत्स तस्य । नार्यमणं पुष्यति

नो सखायं । केवलाघो भवति केवलादी । अहं मेघस्तनयन्वर्षन्नस्मि ।
मामदंत्यहमद्म्यन्यान् । अहं सदमृतो भवामि । मदादित्या अधि सर्वे त
पंति । देवीं वाचमजनयंत देवाः । तेतु । यद्वाग्वदंत्यविचेतनानि । जगाम । अ
नंतमंतादधि निर्मितां मही । यस्यां देवा अदधुर्भोजनानि । एकाक्षरां द्विपदां
षट्पदां च । वाचं देवा उपजीवंति विश्वे । वाचं गंधर्वाः पशवो मनुष्याः । वाची
न मा विश्वा भुवनान्यर्पिता । सा नो हवं जुषतामिंद्रपत्नी । वागक्षरं प्रथमजा ऋत
स्य । वेदानां माताऽमृतस्य नाभिः । सा नो जुषाणोप यज्ञमागात् । अवंती देवी
सुहवा मे अस्तु । यामृषयो मंत्रकृतो मनीषिणः । अन्वैच्छन्देवास्तपसा श्रमेण ।
तां देवीं वाचं हविषा यजामहे । सा नो दधातु सुकृतस्य लोके । चत्वारि वा
क्परिमिता पदानि । मनुष्या वदंति । श्रद्धयाग्निः समिध्यते । श्रद्धया विंदते

उ॰शां॰
२३

हविः॥ श्रद्धां भगस्य मूर्धनि। वचसा वेदयामसि॥ प्रियं श्रद्धे ददतः॥ प्रियं श्रद्धे
दिदासतः॥ प्रियं भोजेषु यज्वस्विदं म उदितं कृधि। यथा देवा असुरेषु। श्र
द्धामुग्रेषु चक्रिरे। एवं भोजेषु यज्वस्वस्माकमुदितं कृधि। श्रद्धां देवा
यजमाना॥ वायुगोपा उपासते। श्रद्धां हृदय्ययाकूत्या। श्रद्धयाह्वयतेह
विः॥ श्रद्धां प्रातर्हवामहे। श्रद्धां मध्यंदिनं परि। श्रद्धां सूर्यस्य निम्रुचि। श्र
द्धे श्रद्धापयेह मा॥ श्रद्धा देवानधिवस्ते। श्रद्धा विश्वमिदं जगत्। श्रद्धां काम
स्य मातरं। हविषा वर्द्धयामसि। ब्रह्म जज्ञानं प्रथमं पुरस्तां॰मसतश्च वि
वः॥ पिता विराजामृषभो रयीणां। अंतरिक्षं विश्वरूप आविवेश। तम राम॰
र्कैरभ्यर्चंति वत्सं। ब्रह्म संतं ब्रह्मणा वर्द्धयंतः॥ ब्रह्म देवानजनयत्। ब्रह्म २३
विश्वमिदं जगत्। ब्रह्मणः क्षत्रं निर्मितं। ब्रह्म ब्राह्मण आत्मना। अंतर

स्मिन्निमे लोकाः। अंतर्विश्वमिदं जगत्। ब्रह्मैव भूतानां ज्येष्ठं। तेन कोऽर्हति
स्पर्द्धितुं। ब्रह्मन्देवास्त्रयस्त्रिंशत्। ब्रह्मन्निंद्रप्रजापती। ब्रह्मन्ह विश्वा भू
तानि। नावीवांतः समाहिता। चतस्र आशाः प्रचरंत्वग्नयः। इमं नो यज्ञं
नयतु प्रजानन्। घृतं पिन्वन्नजरं सुवीरं। ब्रह्म समिद्भवत्याहुतीनां॥॥
आ गावो अग्मन्नुत भद्रमक्रन् सीदंतु गोष्ठे रणयंत्वस्मे। प्रजावतीः पुना प
वतीः पुरुरूपा इह स्युः॥ इंद्राय पूर्वीरुषसो दुहानाः। इंद्रो यज्वने पृणते शि च
क्षति। उपेद्ददाति न स्वं मुषायति। भूयो भूयो रयिमिदस्य वर्धयन्न
भिन्ने खिल्ये निदधाति देवयुं। न ता नशंति न ता अर्वा। नैना अमित्रो
व्यथिरादधर्षति। देवांश्च याभिर्यजते ददाति च। ज्योगित्ताभिः स

उ.शा.

चतेगोपतिःसह।नताअर्वारेणुककाटोऽश्नुते।नसंस्कृतत्रमुपयंति
ताअभि।उरुगायमभयंतस्यता।अनु।गावोमर्त्यस्यविचरंतियज्वनः।
गावोभगोगाव इंद्रोमेअछात्।गावःसोमस्यप्रथमस्यभक्षः।इमाया
गावःसजनासइंद्रः।इछामीद्धृदामनसाचिदिंद्रं।यूयंगावोमेदयथाकृ
शंचित्।अश्रीरंचित्कृणुथासुप्रतीकं।भद्रंगृहंकृणुथभद्रवाचः।बृह
द्वोवयउच्यतेसभासु।प्रजावतीःसूयवसेरुशंतीः।शुद्धाअपःसुप्रपाणे
पिबंतीः।मावस्तेनईशतमाघशंसः।परिवोहेतीरुद्रस्यवृज्यात्।उपेद
मुपपर्चनं।आसुगोषूपपृच्यतां।उपऋषभस्यरेतसि।उपेंद्रतववी ५
र्ये॥ ॥तासूर्याचंद्रमसाविश्वभृत्तमामहत्।तेजोवसुमद्राजतोदि
वि।सामात्मानाचरतःसामाचारिणा।ययोर्व्रतंनममेजातुदेवयोः॥

उभावंतौपरियातोअर्म्या।दिवोनरश्मींस्तनुतोव्यर्णवे।उभाभुवंतीभुव
नाकविक्रतू।सूर्याचंद्रा[illegible]स्तोहतामतीं।परिद्युमद्विश्वविदाउभा
दिवः।सूर्याउभाचंद्रमसाविचक्षणा।विश्ववारावरिवोभावरेण्या।
तानोवतंमतिमंतामहिव्रता।विश्ववप्रीप्रतरणातरंता।सुवर्विदा
दृशयेभूरिरश्मी।सूर्योहिचंद्रावसुत्वेषदर्शिता।मनस्विनाभानु
चरतोनुसंदिवं।अस्यश्रवोनद्यःसप्तबिभ्रति।द्यावाक्षामापृथि
थिवीदर्शितंवपुः।अस्मेसूर्याचंद्रमसाभिचक्षे।श्रद्धेकमिंद्रचरतोवि
तर्तुरं।पूर्वापरंचरतोमाययैतौ।शिशूक्रीडंतौपरियातोअध्वरं।विश्वा
न्ययोभुवनाभिचष्टे।ऋतूनन्योविदधज्जायतेपुनः।हिरण्यवर्णाःशुच

उ. शां
२५

यः पान काया सम्राजा। यासांदेवाः। शिवेनमाचक्षुषापश्यता। आपो भद्रा आ
दित्पश्यामि॥ नासदासीन्नोसदासीत्तदानींनासीद्रजोनोव्योमापरोयत्। कि
मावरीवः कुहकस्यशर्मन्। अंभः किमासीद्गहनंगभीरं। नमृत्युरमृतंन
र्हिन। रात्र्याअह्न आसीत्प्रकेतः। आनीदवातंस्वधयातदेकं। तस्माद्धा
न्यंनपरः किंचनास। तम आसीत्तमसागूढमग्रेप्रकेतं। सलिलंसर्वमा
इदं। तुछेनाभ्वपिहितंयदासीत्। तपसस्तन्महिनाजायतैकं। कामस्तदग्रेस
समवर्त्ततांधि। मनसोरेतः प्रथमंयदासीत्। सतोबंधुमसतिनिरविंदन्।
हृदिप्रतीष्याकवयोमनीषा। तिरश्चीनोविततोरश्मिरेषाम्। अधःस्विदा
सीदुपरिस्विदासीत्। रेतोधा आसन्महिमानआसन्। स्वधाअवस्तात्प्रय
तिः परस्तात्। कोअद्धावेदकइहप्रवोचत्। कुतआजाताकुतइयंविसृष्टिः। अर्वा

राम.
२५

धौ

आग्देवा अस्यविसर्जनाय। अथाकोवेदयतआबभूव। इयंविसृष्टिर्यतआ
बभूव। यदिवादधेयदिवान। योअस्याध्यक्षः परमेव्योमन्। सोअंगवेदय
दिवानवेद॥ ॥ किंस्विद्वनंकउसवृक्षआसीत्। यतोद्यावापृथिवीनिष्टत
क्षुः। मनीषिणोमनसापृछतेदुतत्। यदध्यतिष्ठद्भुवनानिधारयन्। ब्रह्मव
नंब्रह्मसवृक्षआसीत्। यतोद्यावापृथिवीनिष्टतक्षुः। मनीषिणोमनसा
विब्रवीमिवः। ब्रह्माध्यतिष्ठद्भुवनानिधारयन्। प्रातरग्निंप्रातरिंद्रंहवामहे।
प्रातर्मित्रावरुणाप्रातरश्विना। प्रातर्भगंपूषणंब्रह्मणस्पतिं। प्रातःसोममुत
रुद्रंहुवेम। प्रातर्जितंभगमुग्रंहुवेम। वयंपुत्रमदितेर्योविधर्त्ता। आध्रश्चिद्यं
मन्यमानस्तुरश्चित्। राजाचिद्यंभगंभक्षीत्याह। भगप्रणेतर्भगसत्यराधः।
भगेमांधियमुदवाददन्नः। भगप्रणोजनयगोभिरश्वैः। भगप्रनृभिर्नृवं

उ॰ क॰ ति॰ वंतः स्याम। उतेदानीं भगवंतः स्याम। उत प्रपित्व उत मध्ये अह्नां। उतोदिता मघवन्
२६ सूर्यस्य। वयं देवानां सुमतौ स्याम। भग एव भगवां अस्तु देवाः। तेन वयं भ
गवंतः स्याम। तं त्वा भग सर्व इज्जोहवीमि। स नो भग पुर एता भवेह। समध्वरा
योषसो नमंत। दधिक्रावेव शुचये पदाय। अर्वाचीनं वसुविदं भगं नः। रथ
मिवाश्वा वाजिन आवहंतु। अश्वावतीर्गोमतीर्न उषासः। वीरवतीः सदमु
च्छंतु भद्राः। घृतं दुहाना विश्वतः प्रपीताः। यूयं पात स्वस्तिभिः सदा नः॥ ॥ ॥
अग्निर्नः पातु कृत्तिकाः। नक्षत्रं देवमिंद्रियं। इदमासां विचक्षणं। हविरायस्व
भांति रश्मयो यस्य केतवः। यस्येमा विश्वा भुवनानि सर्वा। स कृत्तिकाभि राम॰
रभिसंवसानः। अग्निर्नो देवः सुविते दधातु। प्रजापते रोहिणी वेतु पत्नी। विश्व २६
रूपा बृहती चित्रभानुः। सा नो यज्ञस्य सुविते दधातु। यथा जीवेम शरदः सवीराः
संजुहोतन।
ह॰

रोहिणी देव्युदगात्पुरस्तात्। विश्वा रूपाणि प्रतिमोदमाना। प्रजापतिं हविषा वर्ध
यंती। प्रिया देवानामुपयातु यज्ञं॥२॥ सोमो राजा मृगशीर्षेण आगन्। शिवं नक्ष
त्रं प्रियमस्य धाम। आप्यायमानो बहुधा जनेषु। रेतः प्रजां यजमाने दधातु। य
त्ते नक्षत्रं मृगशीर्षमस्ति। प्रियं राजन्प्रियतमं प्रियाणां। तस्मै ते सोम हविषा वि
धेम। शं न एधि द्विपदे शं चतुष्पदे॥३॥ आर्द्रया रुद्रः प्रथमान एति। श्रेष्ठो दे
वानां पतिरघ्नियानां। नक्षत्रमस्य हविषा विधेम। मा नः प्रजां रीरिषन्मोत वीरान्।
हेती रुद्रस्य परि णो वृणक्तु। आर्द्रा नक्षत्रं जुषतां हविर्नः। प्रमुंचमानो दुरितानि
विश्वा। अपाघशंसं नुदतामरातिं॥४॥ पुनर्नो देव्यदितिः स्पृणोतु। पुनर्वसू नः पु
नरेतां यज्ञं। पुनर्नो देवा अभियंतु सर्वे। पुनःपुनर्वो हविषा यजामः। एवा न दे
व्यदितिरनर्वा। विश्वस्य भर्त्री जगतः प्रतिष्ठा। पुनर्वसू हविषा वर्धयंती। प्रियं देवानामप्ये

उ.शां. तुषाथः ॥६॥ बृहस्पतिः प्रथमं जायमानः। तिष्यं नक्षत्रमभिसंबभूव। श्रेष्ठो देवानां पृ
१९ तनासु जिष्णुः। दिशोनु सर्वा अभयं नो अस्तु। तिष्यः पुरस्तादुत मध्यतो नः। बृहस्पतिर्नः
परिपातु पश्चात्। बाधेतां द्वेषो अभयं कृणुतां। सुवीर्यस्य पतयः स्याम ॥६॥ इदं सर्पेभ्यो
हविरस्तु जुष्टं। आश्रेषा येषामनुयंति चेतः। ये अंतरिक्षं पृथिवीं क्षियंति। ते नः
सर्पासो हवमागमिष्ठाः। ये रोचने सूर्यस्यापि सर्पाः। ये दिवं देवीमनु संचरंति। येषामा
श्रेषा अनुयंति कामं। तेभ्यः सर्पेभ्यो मधुमज्जुहोमि ॥७॥ उपहूताः पितरो ये मघासु।
मनोजवसः सुकृतः सुकृत्याः। ते नो नक्षत्रे हवमागमिष्ठाः। स्वधाभिर्यज्ञं प्रयतं जुषंतां।
ये अग्निदग्धा येऽनग्निदग्धाः। येमुं लोकं पितरः क्षियंति। यांश्च विद्म यां उ च न प्रवि
द्म। मघासु यज्ञं सुकृतं जुषंतां ॥८॥ गवां पतिः फल्गुनीनामसि त्वं। तदर्यमन्वरुण राम.
मित्र चारु। तं त्वा वयं सनितारं सनीनां। जीवा जीवंतमुपसंविशेम। येनेमा विश्वा १९

भुवनानि संजिता। यस्य देवा अनुसंयंति चेतः। अर्यमा राजाजरस्तुविष्मान्। फल्गुनी
नामृषभो रोरवीति ॥९॥ श्रेष्ठो देवानां भगवो भगासि। तत्त्वा विदुः फल्गुनीस्तस्य वि
त्तात्। अस्मभ्यं क्षत्रमजरं सुवीर्यं। गोमदश्ववदुप संनुदेह। भगो ह दाता भग इत्प्र
दाता। भगो देवीः फल्गुनीराविवेश। भगस्येत्तं प्रसवं गमेम। यत्र देवैः सधमा
दं मदेम ॥१०॥ आयातु देवः सवितोपयातु। हिरण्ययेन सुवृता रथेन। वहन्हस्तं
सुभगं विद्मनापसं। प्रयच्छंतं पपुरिं पुण्यमच्छ। हस्तः प्रयच्छत्वमृतं वसीयः। द
क्षिणेन प्रतिगृभ्णीम एनत्। दातारमद्य सविता विदेय। यो नो हस्ताय प्रसुवाति यज्ञं ॥११॥
त्वष्टा नक्षत्रमभ्येति चित्रां। सुभं ससं युवतिं रोचमानां। निवेशयन्नमृतान्मर्त्यां
श्च। रूपाणि पिंशन्भुवनानि विश्वा। तन्नस्त्वष्टा तदु चित्रा विचष्टां। तन्नक्षत्रं भूरि
दा अस्तु मह्यं। तन्नः प्रजां वीरवतीं सनोतु। गोभिर्नो अश्वैः समनक्तु यज्ञं ॥१२॥ ॥

उ. रा. १८

वायुर्नक्षत्रमभ्येतिनिष्ट्यां।तिग्मशृंगोवृषभोरोरुवाणः।समीरयन्भुवनामातरिश्वा
अपद्वेषांसिनुदतामरातीः।तन्नोवायुस्तदुनिष्ट्याशृणोतु।तन्नक्षत्रंभूरि
दाअस्तुमह्यं।तन्नोदेवासोअनुजानंतुकामं।यथातरेमदुरितानिविश्वा॥१३॥
दूरमस्मच्छत्रवोयंतुभीताः।तदिंद्राग्नीकृणुतांतद्विशाखे।तन्नोदेवाअनुम
दंतुयज्ञं।पश्चात्पुरस्तादभयंनोअस्तु।नक्षत्राणामधिपत्नीविशाखे।श्रे
ष्ठाविंद्राग्नीभुवनस्यगोपौ।विषूचःशत्रूनपबाधमानौ।अपक्षुधंनुदतां
मरातिं॥१४॥पूर्णापश्चादुतपूर्णापुरस्तात्।उन्मध्यतःपौर्णमासीजिगाय।तस्यां
देवाअधिसंवसंतः।उत्तमेनाकइहमादयंतां।पृथ्वीसुवर्चायुवतिःसजोषाः।पौ
र्णमास्युदगाच्छोभमाना।आप्याययंतीदुरितानिविश्वा।उरुंदुहांयजमानाय
यज्ञं॥१५॥सध्यास्मिन्हव्यैर्नमसोपसद्य।मित्रंदेवंमित्रधेयंनोअस्तु।अनु

राम. १८

राधान्हविषावर्धयंतः।शतंजीवेमशरदःसवीराः।चित्रंनक्षत्रमुदगात्पुरस्तात्।अनु
राधासइतियद्वदंति।तन्मित्रएतिपथिभिर्देवयानैः।हिरण्ययैर्विततैरंतरिक्षे॥१६॥
इंद्रोज्येष्ठामनुनक्षत्रमेति।यस्मिन्वृत्रंवृत्रतूर्येततार।तस्मिन्वयममृतंदुहानाः।
क्षुधंतरेमदुरितिंदुरिष्टिं।पुरंदरायवृषभायधृष्णवे।अषाढायसहमानायमीढु
षे।इंद्रायज्येष्ठामधुमद्दुहाना।उरुंकृणोतुयजमानायलोकं॥१७॥मूलंप्रजां
वीरवतींविदेय।पराच्येतुनिर्ऋतिःपराचा।गोभिर्नक्षत्रंपशुभिःसमक्तं।अहर्भूया
द्यजमानायमह्यं।अहर्नोअद्यसुवितेदधातु।मूलंनक्षत्रमितियद्वदं
ति।पराचीवाचानिर्ऋतिंनुदामि।शिवंप्रजायैशिवमस्तुमह्यं॥१८॥या
दिव्याआपःपयसासंबभूवुः।याअंतरिक्षउतपार्थिवीर्याः।यासामषाढाअनु
यंतिकामं।तानआपःशंस्योनाभवंतु।याश्चकूप्यायाश्चनाद्याःसमुद्रियाः।

उ॰शां॰ याश्चवैशंतीरुतप्रासचीर्याः।यासामषाढामधुभक्षयंति।तानआपःशꣳस्योना

१९ भवंतु।।१९।।तन्नोविश्वेउपशृण्वंतुदेवाः।तदषाढा अभिसंयंतुयज्ञं।तं

नक्षत्रंप्रथतांपशुभ्यः।कृषिर्वृष्टिर्यजमानायकल्पतां।शुभ्राःकन्यायुवत

यःसुपेशसः।कर्मकृतःसुकृतोवीर्यावतीः।विश्वान्देवान्हविषावर्द्धयंतीः।अ

षाढाःकाममुपयांतुयज्ञं।।२०।।यस्मिन्ब्रह्माभ्यजयत्सर्वमेतत्।अमुंचलो

कमिदमूचसर्वं।तन्नोनक्षत्रमभिजिद्विजित्य।श्रियंदधात्वहृणीयमानं-

उभौलोकौब्रह्मणासंजितेमौ।तन्नोनक्षत्रमभिजिद्विचष्टां।तस्मि

न्वयंपृतनाःसंजयेम।तन्नोदेवासोअनुजानंतुकामं।।२१।।शृण्वंतिश्रो शिव॰

णाममृतस्यगोपां।पुण्यामस्याउपशृणोमिवाचं।महींदेवींविष्णुपत्नी १९

मजूर्यां।प्रतीचीमेनाꣳहविषायजामः।त्रेधाविष्णुरुरुगायोविचक्रमे।।महींदि

वंपृथिवीमंतरिक्षं।तच्छ्रोणैतिश्रवइच्छमाना।पुण्यꣳश्लोकंयजमानायकृण्वती।।२२।।अ

ष्टौदेवावसवःसोम्यासः।चतस्रोदेवीरजराःश्रविष्ठाः।तेयज्ञंपांतुरजसःपुर

स्तात्।संवत्सरीणममृतꣳस्वस्ति।यज्ञंनःपांतुवसवःपुरस्तात्।दक्षिणतोभियंतु

श्रविष्ठाः।पुण्यंनक्षत्रमभिसंविशाम।मानोअरातिरघशꣳसागन्।।२३।।क्षत्र

स्यराजावरुणोधिराजः।नक्षत्राणांशतभिषग्वसिष्ठः।तौदेवेभ्यःकृणुतोदीर्घमायुः।

शतꣳसहस्राभेषजानिधत्तः।यज्ञंनोराजावरुणउपयातु।तन्नोविश्वेअभिसं

यंतुदेवाः।तन्नोनक्षत्रꣳशतभिषग्जुषाणं।दीर्घमायुःप्रतिरद्भेषजानि।२४।।

अजएकपादुदगात्पुरस्तात्।विश्वाभूतानिप्रतिमोदमानः।तस्यदेवाःप्रस

वंयंतिसर्वे।प्रोष्ठपदासोअमृतस्यगोपाः।विभ्राजमानःसमिधानउग्रः।आं

तरिक्षमरुहदगंद्यां।तꣳसूर्यंदेवमजमेकपादं।प्रोष्ठपदासोअनुयंतिसर्वे।।२५।।

उ. शां. २० अहिर्बुध्नियः प्रथमान एति। श्रेष्ठो देवानामुत मानुषाणां। तं ब्राह्मणाः सोमपाः सो
म्यासः। प्रोष्ठपदासो अभिरक्षंति सर्वे। चत्वार एकमभि कर्म देवाः। प्रोष्ठपदास
इति यान्वदंति। ते बुध्नियं परिषद्यꣳ स्तुवंतः। अहिꣳ रक्षंति नमसोपसद्य। २६॥ पू
षा रेवत्यन्वेति पंथां। पुष्टिपती पशुपा वाजबस्त्यौ। इमानि हव्या प्रयता जुषाणा। सुगैर्नो
यानैरुपयातां यज्ञं। क्षुद्रान्पशून्रक्षतु रेवती नः। गावो नो अश्वाꣳ अन्वेतु पूषा। अ
न्नꣳ रक्षंतौ बहुधा विरूपं। वाजꣳ सनुतां यजमानाय यज्ञं॥ २७॥ तदश्विनावश्वयुजो
पयातां। शुभं गमिष्ठौ सुयमेभिरश्वैः। स्वं नक्षत्रꣳ हविषा यजंतौ। मध्वा संपृक्तौ यजु
षा समक्तौ। यौ देवानां भिषजौ हव्यवाहौ। विश्वस्य दूतावमृतस्य गोपौ। तौ नक्षत्रं
जुजुषाणोपयातां। नमोऽश्विभ्यां कृणुमोऽश्वयुग्भ्यां॥ २८॥ अप पाप्मानं भरणीर्भ २०
रंतु। तद्यमो राजा भगवान्विचष्टां। लोकस्य राजा महतो महान्हि। सुगं नः पंथामभ
यं कृणोतु। यस्मिन्नक्षत्रे यम एति राजा। यस्मिन्नेनमभ्यषिंचंत देवाः। तदस्य चित्रꣳ हवि
षा यजाम। अप पाप्मानं भरणीर्भरंतु। २९॥ निवेशनी संगमनी वसूनां। विश्वा रूपा
णि वसून्यावेशयंती। सहस्रपोषꣳ सुभगा रराणा। सा न आगन्वर्चसा संविदाना।
यत्ते देवा अदधुर्भागधेयममावास्ये संवसंतो महित्वा। सा नो यज्ञं पिपृहि विश्व
वारे। रयिं नो धेहि सुभगे सुवीरं॥ ३०॥ नवो नवो भवति जायमानः। अह्नां केतुरु
षसामेत्यग्रे। भागं देवेभ्यो विदधात्यायन्। प्र चंद्रमास्तिरति दीर्घमायुः। यमादित्या
अꣳशुमाप्याययंति। यमक्षितमक्षितयः पिबंति। तेन नो राजा वरुणो बृहस्पतिः। आप्या
ययंतु भुवनस्य गोपाः॥ ३१॥ ये विरूपे समनसा संव्ययंती। समानं तंतुं परितातनाते।
विभू प्रभू अनुभू विश्वतो हुवे। ते नो नक्षत्रे हवमागमेतं। वयं देवी ब्रह्मणा संविदा
नाः। सुरत्नासो देववीतिं दधानाः। अहोरात्रे हविषा वर्धयंतः। अति पाप्मानमति मु
क्त्या गमेम॥ ३२॥ प्रत्युवदृश्यायती। व्युच्छंती दुहिता दिवः। अपो मही वृणुते चक्षुषा।

ग्रह० २१ तमोज्योतिष्कृणोतिसूनरी।उदुस्त्रियाःसृजतेसूर्यः।सचाउद्यन्नक्षत्रमर्चिमत्।
तवेदुषोव्युषिसूर्यस्यच।संभक्तेनगमेमहि।तन्नोनक्षत्रमर्चिमत्।भानुमत्तेजउच्चरत्।
उपयज्ञमिहागमत्।प्रनक्षत्रायदेवाय।इंद्रायेंदुंहवामहे।सनःसवितासुवत्सनिं।पुष्टि
दांवीरवत्तमं।उदुत्यं०चित्रंदेवानां०तत्सुचक्षुः।अदितिर्नउरुष्यतुमहीमूषुमातरं।
इदंविष्णुःप्रतद्विष्णुः।अग्निर्मूर्धाभुवः।अन्नुनोद्यामनुमतिरन्विदनुमतेत्वं।हव्यवा
हंस्विष्टं।अदितिःशर्मयच्छतु।अदितिःपात्वंहसः।महीमूषुमातरंसुव्रतानामृ
तस्यपत्नीमवसेहुवेम।तुविक्षत्रामजरंतीमुरूचींसुशर्माणमदितिंसुप्रणीतिं।
इदंविष्णुर्विचक्रमे०पांसुरे।प्रतद्विष्णुस्तवतेवीर्याय।मृगोनभीमःकुचरोगिरिष्ठाः।
यस्योरुषुत्रिषुविक्रमणेषु।अधिक्षियंतिभुवनानिविश्वा।अग्निर्मूर्धादिवःककु २१
त्।पतिःपृथिव्याअयं।अपांरेतांसिजिन्वति।भुवोयज्ञस्यरजसश्चनेता।यत्रानि
युद्भिःसचसेशिवाभिः।दिविमूर्द्धानंदधिषेस्वर्षांजिह्वामग्नेचकृषेहव्यवाहं॰

अनुनोद्यानुमतिर्यज्ञंदेवेषुमन्यतां।अग्निश्चहव्यवाहनोभवतांदाशुषेमयः।अन्वि
दनुमतेत्वंमन्यासैशंचनःकृधि।क्रत्वेदक्षायनोहिनुप्रणआयूंषितारिषः।हव्यवा
हमभिमातिषाहं।रक्षोहणंपृतनासुजिष्णुं।ज्योतिष्मंतंदीद्यतंपुरंधिं।अग्निंस्विष्टकृ
तमाहुवेम।स्विष्टमग्नेअभितत्पृणाहि।विश्वादेवपृतनाअभिष्य।उरुंनःपंथां
प्रदिशन्विभाहि।ज्योतिष्मद्धेह्यजरंनआयुः।अग्नयेस्वाहा।कृत्तिकाभ्यःस्वाहा।अं
बायैस्वाहा।दुलायैस्वाहा।नितत्न्यैस्वाहा।अभ्रयंत्यैस्वाहा।मेघयंत्यैस्वाहा।वर्षयंत्यै
स्वाहा।चुपुणीकायैस्वाहेति॰ ८।१।।प्रजापतयेस्वाहा।रोहिण्यैस्वाहा।रोचमानायै
स्वाहा।प्रजाभ्यःस्वाहेति।४।२।।सोमायस्वाहा।मृगशीर्षायस्वाहा।इन्वका
भ्यःस्वाहा।औषधीभ्यःस्वाहा।राज्यायस्वाहा।अभिजित्यैस्वाहेति।६।।३।।रुद्रायस्वा
हा।आर्द्रायैस्वाहा।।पिन्वमानायैस्वाहा।पशुभ्यःस्वाहेति४।।४।।अदित्यैस्वाहा।पुन

उ॰ कशां॰ २२

वसुभ्यंस्वाहा। भद्रायैस्वाहा प्रजायैस्वाहेति।४।१।बृहस्पतयेस्वाहा।तिष्यायस्वा
हा। ब्रह्मवर्चसायस्वाहेति ३।६।सर्पेभ्यःस्वाहा।श्लेषाभ्यः स्वाहा। दंदशूकेभ्यःस्वाहेति।
३।७।पितृभ्यःस्वाहा।मघाभ्यःस्वाहा।अनघाभ्यः स्वाहा।अगदाभ्यः।स्वाहा।अरुंधतीभ्यःस्वा
हेति ५।८।अर्यम्णेस्वाहा।फल्गुनीभ्याःस्वाहा।पशुभ्यःस्वाहेति।३।९।भगायस्वा
हा।फल्गुनीभ्यांस्वाहा।श्रैष्ठ्यायस्वाहेति।३।१०।सवित्रेस्वाहा।हस्तायस्वाहा।
ददतेस्वाहा।पृणते।स्वाहा।प्रयच्छतेस्वाहा।प्रतिगृभ्णतेस्वाहेति।६।११।त्वष्ट्रेस्वा
हा।चित्रायैस्वाहा।चैत्रायस्वाहा।प्रजायैस्वाहेति।४।१२।वायवेस्वाहा।निष्ट्यायैस्वाहा।
कामचारायस्वाहा।अभिजित्यैस्वाहेति।४।१३।इंद्राग्निभ्यांस्वाहा।विशाखाभ्यांस्वाहा। राम॰
श्रैष्ठ्यायस्वाहा।अभिजित्यैस्वाहेति।४।१४।पौर्णमास्यैस्वाहा।कामायस्वाहा।आगत्यैस्वा
हेति ३।१५।मित्रायस्वाहा।अनुराधेभ्यःस्वाहा।मित्रधेयायस्वाहा।अभिजित्यैस्वाहेति।४।१६। २२
इंद्रायस्वाहा।ज्येष्ठायैस्वाहा।ज्यैष्ठ्यायस्वाहा।अभिजित्यैस्वाहेति।४।१७।प्रजापत

य्भ्यः

येस्वाहा।मूलायस्वा[illegible]हा।प्रजायैस्वाहेति।३।१८।अद्भ्यःस्वाहा।आषाढाभ्यःस्वा
हा।समुद्रायस्वाहा।कामायस्वाहा।अभिजित्यैस्वाहेति।५।१९।विश्वेभ्योदेवेभ्यः
स्वाहा।आषाढाभ्यःस्वाहा।अनपजय्यायस्वाहा।जित्यैस्वाहेति।४।२०।ब्रह्मणेस्वाहा।
अभिजितेस्वाहा।ब्रह्मलोकायस्वाहा।अभिजित्यैस्वाहेति।४।२१।विष्णवेस्वाहा।श्रो
णायैस्वाहा।श्लोकायस्वाहा।श्रुतायैस्वाहेति।४।२२।वसुभ्यःस्वाहा।श्रविष्ठाभ्यः
स्वाहा।अग्र्यायस्वाहा।परीत्यैस्वाहेति।४।२३।वरुणायस्वाहा।शतभिषजेस्वाहा।भेष
जेस्वाहेति।३।२४।अजायैकपदेस्वाहा।प्रोष्ठपदेभ्यःस्वाहा।तेजसेस्वाहा।ब्र
ह्मवर्चसायस्वाहेति।४।२५।अहयेबुध्नियायस्वाहा।प्रोष्ठपदेभ्यःस्वाहा।
प्रतिष्ठायैस्वाहेति।३।२६। पूष्णेस्वाहा।रेवत्यैस्वाहा।पशुभ्यःस्वाहेति।३।२७।
अश्विभ्यांस्वाहा।अश्वयुग्भ्यांस्वाहा।श्रोत्रायस्वाहा।श्रुत्यैस्वाहेति।४।१।
यमायस्वाहा।अपभरणीस्वाहा।राज्यायस्वाहा।अभिजित्यैस्वाहेति।४।२।अमावा

भ्यः।

शतभिषजेस्वाहा॥

उ॰क॰ स्यायस्वाहा काम्याय स्वाहा गेयस्वाहेति ७॥ चंद्रमसे स्वाहा प्रतिदृश्यायेस्वाहा। अहोरात्रे
२२ भ्यः स्वाहार्द्धमासेभ्यः स्वाहा। मासेभ्यः स्वाहर्तुभ्यः स्वाहा। संवत्सरायस्वाहेति ७।२ अह्ने
स्वाहा रात्रियेस्वाहा। अतिमुक्तयेस्वाहेति। ७।७ उषसे स्वाहा व्युष्ट्यैस्वाहा। व्युषुष्येस्वाहा
व्युछंत्यैस्वाहा। व्युष्टायेस्वाहेति ५।८। नक्षत्रायस्वाहोदेष्यतेस्वाहा। उद्यतेस्वाहोदिताय
स्वाहा। हरसेस्वाहा भासेस्वाहा। भ्राजसेस्वाहा तेजसेस्वाहा। तपसेस्वाहा ब्रह्मवर्चसाय
स्वाहेति ६।७५ सूर्याय स्वाहा नक्षत्रेभ्यः स्वाहा। प्रतिष्ठायेस्वाहेति ३।६ अदित्यैस्वाहा
ये प्रतिष्ठैस्वाहेति २।७ विष्णवेस्वाहा यज्ञायस्वाहा। प्रतिष्ठायेस्वाहेति ७।८। प्राचीदिक्
अग्निर्देवता। अग्निꣳ सदिशां देवं देवतानामृछतु। योमेतस्यैदिशोभिदासति। प्रतीचीदि
क्। सोमोदेवता। सोमꣳ सदिशां देवं देवतानामृछतु। योमेतस्यैदिशोभिदासति। उदीचीदि
क्। मित्रावरुणौ देवता। मित्रावरुणौ सदिशां देवौ देवतानामृछंतु। योमेतस्यैदिशो
दक्षिणादिक्। इंद्रोदेवता। इंद्रꣳ सदिशां देवं देवतानामृछतु योमेतस्यैदिशो
भिदासति ३ 22 राम॰

भिदासति ऊर्ध्वादिक् मित्रावरुणौदेवता बृहस्पतिर्देवता। बृहस्पतिꣳ सदिशां देवं देवतानामृछतु
योमेतस्यैदिशोभिदासति इयंदिक् अदितिर्देवता अदितिꣳ सदिशां देवीं देवतानामृछतु। योमे
तस्यैदिशोभिदासति। सुवर्णं घर्मं परिवेद वेनं। इंद्रस्यात्मानं दशधाचरंतं। अंतः समुद्रे मनसाचरं
तं। ब्रह्मान्वविंदद्दशहोतारमर्णे। अंतः प्रविष्टः शास्ता जनानां। एकः सन् बहुधा विचारः। शतꣳ शु
क्राणि यत्रैकं भवंति। सर्वे वेदा यत्रैकं भवंति। सर्वे होतारो यत्रैकं भवंति। समानसीन आत्मा ज
नानां। ६।१ अंतः प्रविष्टः शास्ता जनानाꣳ सर्वात्मा। सर्वाः प्रजा यत्रैकं भवंति। चतुर्होतारो यत्र संपदं
गच्छंति देवैः। समानसीन आत्मा जनानां। ब्रह्मेंद्रमग्निं जगतः प्रतिष्ठां। दिव आत्मानꣳ सवितारं बृ
हस्पतिं। चतुर्होतारं प्रदिशोनु कॢप्तं। वाचो वीर्यं तपसान्वविंदत्। अंतः प्रविष्टं कर्तारमेतं। त्वष्टारꣳ
रूपाणि विकुर्वंतं विपश्चितं। २ अमृतस्य प्राणं यज्ञमेतं। चतुर्होतॄणामात्मानं कवयो निचिक्युः।
अंतः प्रविष्टं कर्तारमेतं। देवानां बंधु निहितं गुहासु। अमृतेन कॢप्तं यज्ञमेतं। चतुर्होतॄणामा
त्मानं कवयो निचिक्युः। शतं नियुतः परिवेद विश्वा विश्ववारः। विश्वमिदं वृणाति। इंद्रस्या
सा

उ.न.

२८

स्मानिहितः पंचहोता। अमृतं देवानामायुः प्रजानां ३। इंद्रं राजानं सवितारमेतं। वायोरात्मानं क
वयो निचिक्युः। रश्मिं रश्मीनां मध्ये तपंतं। ऋतस्य पदे कवयो निपांति। य आंडकोशे भुवनं बिभ
र्ति। अनिर्भिन्नः सन्नथ लोकान्विचष्टे। यस्यांडकोशं शुष्ममाहुः प्राणमुल्बं। तेन क्लृप्तोमृतेन
नाहं मिस्मि। सुवर्णं कोशं रजसा परीवृतं। देवानां वसुधानीं विराजं ४ अमृतस्य पूर्णां तामु क
लां विचक्षते। पादं षड्ढोतुर्न किलाविवित्से। येन र्तवः पंचधोत क्लृप्ताः। उत वा षड्ढा मनसोत
क्लृप्ताः। तं षड्ढोतारमृतुभिः कल्पमानं। ऋतस्य पदे कवयो निपांति। अंतः प्रविश्य तिष्ठत्यमृतो अं
तःश्चंद्रमसि मनसा चरंतं। सहैव संतं न विजानंति देवाः। इंद्रस्यात्मानं शतधा चरंतं ५ इंद्रो
राजा जगतो य ईशे। सप्तहोता सप्तधा विक्लृप्तः। परेण तंतुं परिषिच्यमानं। अंतरादित्ये मनसा च
रंतं। देवानां हृदयं ब्रह्मान्वविंदत्। ब्रह्मैतद्ब्रह्मण उज्जभार। अर्कं श्चोतंतं सरिरस्य मध्ये। आ
यस्मिन्सप्त पेरवः। मेहंति बहुलां श्रियं। बह्वश्वामिंद्र गोमतीं ६ अच्युतां बहुलां श्रियं। स हरि

राम.

२८

३

६

सहरिर्वसुवित्तमः। पेरुरिंद्राय पिन्वते। बह्वश्वामिंद्र गोमतीं। अच्युतां बहुलां श्रियं। मह्यमिंद्रो नियच्छ
तु। शतं शता अस्य युक्ता हरीणां। अर्वाङायातु वसुभी रश्मिरिंद्रः। प्रमंहमाणो बहुलां श्रियं
। रश्मिरिंद्रः सविता मे नियच्छतु ७ घृतं तेजो मधुमदिंद्रियं। मय्ययमग्निर्दधातु। हरिः पतंगः पटरी सु
पर्णः। दिविक्षयो नभसा य एति। स न इंद्रः कामवरं ददातु। पंचारं चक्रं परिवर्तते पृथु। हिरण्यज्योतिः
सरिरस्य मध्ये। अजस्रं ज्योतिर्नभसा सर्पदेति। स न इंद्रः कामवरं ददातु। सप्त युंजंति रथमेकचक्रं
८ एको अश्वो वहति सप्तनामा। त्रिनाभि चक्रमजरमनर्वं। येनेमा विश्वा भुवनानि तस्थुः। भद्रं प
श्यंत उपसेदुरग्रे। तपो दीक्षामृषयः सुवर्विदः। ततः क्षत्रं बलमोजश्च जातं। तदस्मै देवा अभिसंनमंतु। श्वे
तं रश्मिं बोभुज्यमानं। अपां नेतारं भुवनस्य गोपां। इंद्रं नि चिक्युः परमे व्योमन्। रोहिणीः पिं
गला एकरूपाः। क्षरंतीः पिंगला एकरूपाः। शतं सहस्राणि प्रयुतानि नाव्यानां। अयं यः श्वेतो र
श्मिः। परि सर्वमिदं जगत्। प्रजां पशून्धनानि। अस्माकं ददातु। श्वेतो रश्मिः परि सर्वं बभूव। स
वन्मह्यं पशून्विश्वरूपान्। पतंगमक्तमसुरस्य मायया। हृदा पश्यंति मनसा मनीषिणः। समु

परश्च

मनु

उ. हृद्यंतः कवयो विचक्षते । मरीचीनां पदमिच्छंति वेधसः । पतंगो वाचं मनसा बिभर्ति । तां गंधर्वोऽवि
२५ दद्गर्भे अंतः । तां द्योतमानां स्वर्यं मनीषां । ऋतस्य पदे कवयो निपांति । ये ग्राम्याः पशवो विश्वरू
पाः । विरूपाः संतो बहुधैकरूपाः । अग्निस्तां अग्रे प्रमुमोक्तु देवः । प्रजापतिः प्रजया संविदानः ।
वीतं स्तुकेस्तुके युवमस्मासु नियच्छतं । प्रप्र यज्ञपतिं तिर । ये ग्रा० तेषां सप्तानामिह रंतिरस्तु
रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय । य आरण्याः पशवो विश्वरूपाः । विरूपा० पाः । वायुस्तां
अग्रे प्रमुमोक्तु देवः । प्रजापतिः प्रजया संविदानः । इडायै सृप्तं घृतवच्चराचरं । देव अन्ववविं
दद्गुहाहितं । य आरण्या० विरू० पाः । तेषां सप्तानामिह रंतिरस्तु । रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय
१२ अंभस्य पारे भुवनस्य मध्ये नाकस्य पृष्ठे महतो महीयान् । शुक्रेण ज्योतींषि समनुप्रवि
ष्टः प्रजापतिश्चरति गर्भे अंतः । यस्मिन्निदं सं च वि चैति सर्वं यस्मिन् देवा अधि विश्वे निषेदुः । त रामु.
देव भूतं तदु भव्यमा इदं तदक्षरे परमे व्योमन् । येनावृतं खं च दिवं महीं च येनादित्यस्तपति २५
तेजसा भ्राजसा च । यमंतः समुद्रे कवयो वयंति यदक्षरे परमे प्रजाः । यतः प्रसूता जगतः प्र
सूती तोयेन जीवान्व्यचसर्ज भूम्यां । यदोषधीभिः पुरुषान्पशूंश्च विवेश भूतानि चराचराणि । अ
तः परं नान्यदणीयसं हि परात्परं यन्महतो महांतं । यदेकमव्यक्तमनंतरूपं विश्वं पुराणं तम
सः परस्तात् । १३ तदेवर्तं तदु सत्यमाहुस्तदेव ब्रह्म परमं कवीनां । इष्टापूर्तं बहुधा जातं जायमा
नं विश्वं बिभर्ति भुवनस्य नाभिः । तदेवाग्निस्तद्वायुस्तत्सूर्यस्तदु चंद्रमाः । तदेव शुक्रममृतं तद्ब्र
ह्म तदापः स प्रजापतिः । सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि । कला मुहूर्ताः काष्ठाश्चाहो
रात्राश्च सर्वशः । अर्धमासा मासा ऋतवः संवत्सरश्च कल्पतां । स आपः प्रदुघे उभे इमे अंत
रिक्षमथो सुवः । नैनमूर्ध्वं न तिर्यंचं न मध्ये परिजग्रभत् । न तस्येशे कश्चन तस्य नाम महद्यशः ।
२ न संदृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनं । हृदा मनीषा मनसाभिक्लृप्तो
य एनं विदुरमृतास्ते भवंति । अद्भ्यः संभूतो हिरण्यगर्भ इत्यष्टौ । एष हि देवः प्रदिशो
नु सर्वाः पूर्वो हि जातः स उ गर्भे अंतः । स विजायमानः स जनिष्यमाणः प्रत्यङ्मुखास्तिष्ठ
ति विश्वतोमुखः । विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतो हस्त उत विश्वतस्पात् । संबाहु

५०
२६

श्यां धमति संपतत्रै र्द्यावापृथिवी जनयन्देव एकः। वेनस्तत्पश्यन्विश्वा भुवनानि विद्वान्यत्र विश्वं
भवत्येकनीडं। यस्मिन्निदं सं च वि चैकं स ओतः प्रोतश्च विभुः प्रजासु। प्र तद्वोचे अमृतं नु विद्वान्
गंधर्वो नाम निहितं गुहासु। त्रीणि पदानि निहिता गुहास्य यस्तद्वेद स पितुः पितासत्। स नो बंधुर्जनिता
स विधाता धामानि वेद भुवनानि विश्वा। यत्र देवा अमृतमानशानास्तृतीये धामान्यभ्यैरयंत। परि द्या
वापृथिवी यांति सद्यः परि लोकान्परि दिशः परि सुवः। ऋतस्य तंतुं विततं विचृत्य तदपश्यत्तदभवत्प्र
जासु। परीत्य लोकान्परीत्य भूतानि परीत्य सर्वाः प्रदिशो दिशश्च। प्रजापतिः प्रथमजा ऋतस्यात्मना
त्मानमभि संबभूव। सदसस्पतिमद्भुतं प्रियमिंद्रस्य काम्यं। सनिं मेधामयासिषं। उद्दीप्यस्व जात
वेदोपघ्नन्निर्ऋतिं मम। पशूंश्च मह्यमावह जीवनं च दिशो दिश। मा नो हिंसीज्जातवेदो गामश्वं
पुरुषं जगत्। अबिभ्रदग्न आगहि श्रिया मा परिपातय। पुरुषस्य विद्म सहस्राक्षस्य महादेवस्य
धीमहि। तन्नो रुद्रः प्रचोदयात्। तत्पुरुषाय विद्महे महादेवाय धीमहि। तन्नो रुद्रः प्रचोदयात्।
तत्पुरुषाय विद्महे वक्रतुंडाय धीमहि। तन्नो दंतिः प्रचोदयात्। तत्पुरु० महासेनाय धीमहि।

तत्पु० चक्रतुंडाय तन्नो नंदिः प्र०

राम
२६

तन्नः षण्मुखः प्रचोदयात्। तत्पु० सुवर्णपक्षाय धीमहि। तन्नो गरुडः प्रचोदयात्। वेदात्मनाय वि
द्महे हिरण्यगर्भाय धीमहि। तन्नो ब्रह्म प्रचोदयात्। नारायणाय विद्महे वासुदेवाय धीमहि
तन्नो विष्णुः प्रचोदयात्। वज्रनखाय विद्महे तीक्ष्णदंष्ट्राय धीमहि। तन्नो नारसिंहः प्रचोद
यात्। भास्कराय विद्महे महद्द्युतिकराय धीमहि। तन्नो आदित्यः प्रचोदयात्। वैश्वानराय
विद्महे लालीलाय धीमहि। तन्नो अग्निः प्रचोदयात्। कात्यायनाय विद्महे कन्यकुमारी
धीमहि। तन्नो दुर्गिः प्रचोदयात्। सहस्रपरमा देवी शतमूला शतांकुरा। सर्वं हरतु मे पापं दूर्वा
दुःस्वप्ननाशिनी। कांडात्कांडात्प्ररोहंती परुषः परुषः परि। एवा नो दूर्वे प्रतनु सहस्रेण शतेन
च। या शतेन प्रतनोषि सहस्रेण विरोहसि। तस्यास्ते देवीष्टके विधेम हविषा वयं। अ
श्वक्रांते रथक्रांते विष्णुक्रांते वसुंधरा। शिरसा धारयिष्यामि रक्षस्व मां पदे पदे। भूमिर्धेनुर्धर
णी लोकधारिणी। उद्धृतासि वराहेण कृष्णेन शतबाहुना। मृत्तिके हन मे पापं यन्मया दुष्कृतं
कृतं। मृत्तिके ब्रह्मदत्तासि काश्यपेनाभिमंत्रिता। मृत्तिके देहि मे पुष्टिं त्वयि सर्वं प्रतिष्ठितं

ॠ.
२७

८। मृत्तिके प्रतिष्ठिते सर्वं तन्मे निर्णुद मृत्तिके। त्वया हतेन पापेन गच्छामि परमां गतिं। यतं इन्द्र भ० आहि
। स्वस्तिदा० करः। स्वस्तिन०१ धातु। आपां तमन्युः स्तृपलप्रसर्मो धुनिः शिमीवां छरुमाꣳ ऋजीषी। सो
मो विश्वान्यतसावना नि नाविर्मिद्भिरप्रतिमानानि देभुः। ९ ब्रह्मजज्ञानं० विवः। स्योनापृथिवि० प्रथा
। गंधद्वारां० श्रियं श्रीर्मे भजतु। अलक्ष्मीर्मे नश्यातु। विष्णुमुखावेदेवा छंदोभिरिमां लोकानन
पजय्याम्भ्यजयन्। महाꣳ इन्द्रो वज्रबाहुः षोडशी शर्मयच्छतु। १० स्वस्तिनो मघवाकरोतु हंतु
पाप्मानं योस्मान्द्वेष्टि। वरुणंप० भसज्जोषाइन्द्रसगणो मरुद्भिः सोमं पिबवृत्रहञ्छूरविद्वा
न्। जहिशत्रूꣳ रपमृधोनुदस्वाथाभयं कृणुहि विश्वतोनः। सुमित्रान आप ओषधयः
संतु दुर्मित्रास्तस्मै भूयासुर्योस्मान्द्वेष्टि यं च वयं द्विष्मः। आपोहिष्ठा म० तन। रुः। महारुद्र
वनः। हिरण्यशृंगं वरुणं प्रपद्ये तीर्थं मे देहि याचितः। यन्मया भुक्तमसाधूनां पापेभ्यश्च
प्रतिग्रहः। यन्मे मनसा वाचा० तन्म इन्द्रो वरुणो बृहस्पतिः सविता च पुनंतु पुनः पुनः।
॥

राम.
२७

नम
नमोग्नये प्सुमते नमइन्द्राय वरुणाय नमो वारुण्यै नमो मद्भ्यः। १ यदपां क्रूरं यदमेध्यं यद
शांतमपगच्छतात्। अत्याशनादतीपानाद्यच्च उग्रात्प्रतिग्रहात्। तन्नो वरुणो राजा पाणिना
ह्यवमर्शतु। सोहमपापो विरजो निर्मुक्तो मुक्तकिल्बिषः। नाकस्य पृष्ठमारुह्य गच्छेद्ब्रह्मस
लोकतां। यश्चाप्सु वरुणः स पुनात्वघमर्षणः। इमं मे गं० मया। ऋतं च स० र्णवः। ११ समु
द्रादर्ण० धो सुव। यत्पृथिव्याꣳ रजस्वमंतरिक्षे विरोदसी। इमाꣳ स्तदापो वरुणः पुनात्वघ
मर्षणः। पुनंतु वसवः पुनातु वरुणः पुनात्वघमर्षणः। एष भूतस्य मध्ये भुवनस्य गोप्ता।
एष पुण्यकृतां लोकानेष मृत्योर्हिरण्मयं। द्यावापृथिव्योर्हिरण्मयꣳ संꣳश्रितꣳ सुवः। ८
स नः सुवः संशिशाधि। आर्द्रं ज्वलति ज्योतिरहमस्मि। ज्योतिर्ज्वलति ब्रह्माहमस्मि। योह
मस्मि ब्रह्माहमस्मि। अहमस्मि ब्रह्माहमस्मि। अहमेवाहं मां जुहोमि स्वाहा। अकार्यकार्य
वकीर्णी स्तेनो भ्रूणहा गुरुतल्पगः। वरुणोपामघमर्षणस्तस्मात्पापात्प्रमुच्यते। रजो
भूमिस्त्वमां रोदयस्व प्रवदंति धीराः। अक्रान्समुद्रः प्रथमे विधर्मन्जनयन्प्रजा भुव

उ.

२८ नस्यराज्ञा। इषापवित्रे अधिसानो अव्ये बृहत्सोमो वावृधे सुवानइंदुः। २५ दधिक्राव्णो अ
का०। आपोहि०३। यादिद्धिते०। यास्किंचेदं०। कितवा०। उदुत्तम०। अथावयमा०। अवतेहेडो०
तत्त्वायामि०। हिरण्यव०। यासांराजा०। यासांदेवा०। शिवेनमा०। पवमानःसुव०। जातवेदसमाजे
यंसापुनातु। भूर्भुवस्वः। तच्छंयोरावृणी०। शंचतुष्पदे। नमोब्रह्मणे०। करोमि। इतिपरिधानी
यांत्रिन्नृत्यसर्वं प्रणवेनोत्थाप्य यस्येतक्रियेतंतं यजमानं व्याहृतिभिः देवस्यत्वेत्याधी
षकमंत्रेण प्रोक्षंति। भूर्भुवःस्वः। देवस्यत्वा०भ्यां सरस्वत्यै वाचोयंतुर्यंत्रेणाग्नेस्त्वा।
साम्राज्येनाभिषिंचामींद्रस्यबृहस्पतिस्त्वासाम्राज्येनाभिषिंचामि। यजमानः हुत
ब्राह्मणेभ्योदक्षिणांदद्यात्। पुरस्ताद्दुपरिष्टाद्धिरण्यं। अथप्रतिसरबंधः नांदी
मुखदिने प्रदोषेवुदकशांतिवत्प्रतिसरबंधंकुर्यात्। तत्रविशेषः। करिष्यमाणाक राम.
र्मांगभूतं प्रतिसरबंधंकरिष्ये। इतिसंकल्प्य शुचौदेशेपूर्ववत्स्थंडिलस्यसमंताद्ब्राह्म २८

णानाचमय्योपविशेत् तत्रैकमाचार्यत्वेनवृणुयात्। अन्यान्पूर्ववत्प्रतिदिशंजपकर्तृत्वेन।
आचार्यस्स्वहस्तेन कुर्वीतस्थंडिलेसम। सैकतंवतुरस्रंचप्रवेशप्राग्वस्त्रदर्शके। लेखादि सर्वंपू
र्ववदाचार्यः कुर्वीत पात्रासादने विशेषः शालितंडुलान्कंसस्थापयेत्सफलान्कुसुमान
नवतंतुमयंसूत्रं गंधादीन्तत्र विन्यसेत्। प्रोक्षणमध्येतस्य स्थंडिलमध्ये पुरोग्रेषुकुशेष्वा
धीयतांघटः। पूरयेदुदकैर्यस्त्वंमंत्रेव्याहृतिभिस्ततः। परिस्तरणंपूर्ववत्। देवस्यत्वेतिपु
रस्तादुत्सादि। तिरःपवित्रान्निधाय। व्याहृतिभिर्जलमानयेति। तैरवयवान्। दूर्वाक्षतफ
लैःकीर्णगंधादिभिरर्चयेत्। पूजानंतरंकुशैर्दूर्वाभिः प्रच्छाद्याभिमृशतिशंनोदेवीरि
ति। ततःसर्वब्राह्मणायामत्रयंत्रस्थैर्वालस्यतत्त्वंपरस्तुतेति। सावित्रींछंदसामाग्निमनुवाकेकेणु
चच। अस्येयशास्विन्नित्यादिचतुर्ऋच्यमृचांततः हिरण्यवर्णाःशुचयः। यासांराजा०। यासांदेव०। शि
वेन०। यददःसंप्रयतीरहावनदताहते। तस्मादानद्योनामस्थ तावोनामानिसिंधवः। य

उ. स्रवितावरुणेनताः शीर्भं समवल्गात। दौर्न्नो दिद्रोवोयतीतस्मादापो अनुस्थन। अप
२९ कामं स्यंदमाना अवीवरतमो वोहिकं इंद्रोवः शक्तिभिर्देवीस्तस्माद्वार्णामवोहितं। एकोदे
वो अप्यतिष्ठत्स्यंदमाना यथावशा। उदानिषुर्मही रितितस्मादुदकमुच्यते। आपो भद्रा घृ
तो: तमिदापआसुरग्नीषोमौ बिभ्रत्यापइत्ताः। तीव्रोरसो मधुपृचामरंगम आमाप्राणेन
सहवर्चसागन्। आदित्पश्याम्युतवा शृणोम्यामाघोषोगच्छतिवाङ्मासां। मन्ये भेजान
अमृतस्यतर्हि हिरण्यवर्णा अतृपं यदा वः। आपोहि० ३ दिविश्रयस्वांतरिक्षेयतस्व
पृथिव्यासंभव ब्रह्मवर्चसमसि ब्रह्मवर्चसायत्वा। पवमानः सुव० ९ तुभ्य। उदुत्तमं० अस्त राम.
भ्नाद्या० यत्किंचे० कितवा० अवते हे० तत्त्वायामि० परिपो० स्तुहि श्रुतं० मीढुष्टम० अर्हन्बिभ०
त्वमग्ने रु० भुवो राजानं० ब्रह्मज्ज्ञं० ब्रह्मणस्पतिस्त्वस्याकुलीनां ६ विष्णोर्नुकं वीर्याणि प्र २९
वोचं यः पार्थिवानि विममे रजांसि। यो अस्कभायदुत्तरं सधस्थं विचक्रमाणस्त्रेधो

रुगायः। तदस्य प्रियमभिपाथो अश्यां। नरो यत्र देवयवो मदंति। उरुक्रमस्य सहि बंधुरित्था। विष्णोः
पदे परमे मध्व उत्सः। प्रतद्विष्णुः स्तवते वीर्याय। मृगो न भीमः कुचरो गिरिष्ठाः। यस्योरुषु त्रिषु
विक्रमणेषु। अधिक्षियंति भुवनानि विश्वा। परो मात्रया तनुवा वृधान। न ते महित्वम० २ न्वश्नुव
ति। उभे ते विद्म रजसी पृथिव्या विष्णो देवत्वं परमस्य वित्से। विचक्रमे पृथिवीमेष एतां। क्षेत्रा
य विष्णुर्मनुषे दशस्यन्। ध्रुवासो अस्य कीरयो जनासः। उरुक्षितिं सुजनिमा चकार
। त्रिर्देवः पृथिवीमेष एतां। विचक्रमे शतर्चसं महित्वा। प्रविष्णुरस्तु तवसस्तवीयान्। त्वेषं ह्यस्य
स्थविरस्य नाम। जातवेदसे० तामग्नि० अग्ने त्वं म०। विश्वानि नो दुर्गहा जातवेदः। सिंधुं न ना
पृतनाजितं सहमानमुग्रमग्निं हुवेम परमात्सधस्थात्। स नः पर्षदति दुर्गाणि विश्वा क्षाम
द्देवो अति दुरितात्यग्निः। हिरण्यवर्णां हरिणीं० विदयं पुरुषानहं। नमो ब्रह्मणे इति त्रिरन्त्य
समापयेत्। प्रणवेनात्मायव्याहृतिभिः सुरभिमत्यालिंगाभिः स्त्रवंयज्ञमानं च प्रोक्षति।
दधिक्रा०। आपोहिष्ठा व्याहृतिभिः प्रोक्षंति। आदाय वासुकिं ध्यात्वा गरुडीयाद्दक्षिणकर।

ब्लू

उ. यस्यकुर्वन्सतस्याग्निरायुष्मानादियंवलिः इहत्वामेतिवश्रीयास्त्रीणांवामकरेतथा। इहत्वा
ॐ मक्षत्रष्टेद्दूहस्त्रियंत्रिष्टभोऽनः शुभितमुग्रवीरं। इंद्रस्तोमेनपंचादशेन मध्यमिदंवातेनसगरे
६ णरक्ष। स्त्रीणांबंधनेऽहेः। आयुषायुष्मती करोमीति। द्विजेभ्योदक्षिणांदद्यात। आचार्यवि
रहेकर्तागुरुरध्वर्युरेववा। आयुष्मतीमितिह्याङ्कुरुहस्तह विदस्त्रियः कृतोप्यकृतएवस्या
दधिकारीनचेतफो।ली। तस्मादनधिकारेणनप्राम्नाद्धंकर्थंचन। नाश्रोत्रियस्ययस्येद्गेद्धु।
त्रियोवेदपारगः॥ ॥ इत्युदकशांतिव्रतिसरबंधो॥ ॥ छ॥ छ॥ ॥

राम. ३०

865

चित्रभानौसंवदितिलैषाष्टम्यामिदंस्फदि घनश्यामेनादक्षानिविलिखि
तंशुभं श्रीरामोघनमः श्री श्री श्री श्री श्री